# Pakshikritam Shrirama Navaka stotram

# पक्षीकृतं श्रीरामनवकस्तोत्रम्

## Document Information

Text title : Shrirama Navakastotram

File name : rAmanavakastotram.itx

Category : raama, nava

Location : doc_raama

Transliterated by : Vishwesh GM

Proofread by : Vishwesh GM, NA

Description/comments : from Anandaramayana

Latest update : September 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2022

*sanskritdocuments.org*

# पक्षीकृतं श्रीरामनवकस्तोत्रम्

मङ्गलम्-
रामचन्द्रं जगत्पूज्यं रघुवंशविभूषणम् ।
लोकानन्दप्रदातारं तमीशं प्रणमाम्यहम् ॥

जयतुराघवो जानकीयुतो जयऽखिलेश्वर राजकेश्वरः ।
दशरथात्मजो लक्ष्मणाग्रजो जयतु नापतिं ताटिकान्तकः ॥ १॥

जयतु कौशिकस्याध्वरङ्गतो जयतु राक्षसां मारकोमहान् ।
जयतु गौतमऽहल्यया स्तुतो जयतु जानकीतात मानितः ॥ २॥

जयतु नः पतिश्चापखण्डनो जनकजावरोन्मुक्त मालया ।
नृपसभाङ्गणे कौशिकानुगः परम शोभितश्चातिहर्षित ॥ ३॥

जयतु भूमिजाङ्घ्रोस्तदा मुदा निज करोत्पलेस्थाप्यराघवः ।
कमल हस्तके नाकरोन्नति स रघुनन्दनो पातु नः सुखम् ॥ ४॥

जयतु भूमिजालिङ्गितो महान् जनमनोहर चातिशोभनः ।
परशुरामदं धृत्य वै धनुर्निजपितुर्तदाऽदर्शयन् बलम् ॥ ५॥

जयतु कैकयी प्रेरितोवनं जयतु सीतया भोग कृच्चिरम् ।
जयतु पर्वतेवास कृच्चिरं जयतु योत्रिणा पूजितो वने ॥ ६॥

जयतु ते विराघस्य घातकृत् जयतु दूषणादि प्रमर्दनः ।
जयतु यो मृगं मोचयन् भवात्जयतु यः कबन्धक्षणाज्जहौ ॥ ७॥

जयतु वालिहा सेतुकारको जयतुरावणादिक मर्दकः ।
जयतु स्वं पदं प्रापसीतया जयतु मङ्गलं स्नान कृन्मुदा ॥ ८॥

जयतु वाक्यतो भूसुरस्य यः सकल भूतल पर्यटन् चिरम् ।
जयतु याग कुल्लोक शिक्षया जयतु जानकी-रञ्जयन् स्थितः ॥ ९॥

रघुवरस्य यत्पक्षिभिकृतं नवकमुत्तमं यः पठिष्यति ।

तपन निर्गमे भक्ति तत्परो निजमनार्थितं सङ्गमिष्यति ॥ १०॥

इति आनन्दरामायणान्तर्गतं रामनवकं सम्पूर्णम् ।

Encoded and proofread by Vishwesh GM

*Pakshikritam Shrirama Navaka stotram*

pdf was typeset on September 16, 2022

Please send corrections to *sanskrit@cheerful.com*